শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৩

*হিরণ্যাক্ষৱধৱর্ণনম্*

হিরণ্যাক্ষং তাৱদ্বরদ ভৱদন্বেষণপরং
চরন্তং সাংৱর্তে পযসি নিজজঙঘাপরিমিতে।
ভৱদ্ভক্তো গত্বা কপটপটুধীর্নারদমুনিঃ
শনৈরূচে নন্দন্ দনুজমপি নিন্দংস্তৱ বলম্॥ ১ ॥

স মাযাৱী ৱিষ্ণুর্হরতি ভৱদীযাং ৱসুমতীং
প্রভো কষ্টং কষ্টং কিমিদমিতি তেনাভিগদিতঃ।
নদন্ ক্বাসৌ ক্বাসাৱিতি স মুনিনা দর্শিতপথো
ভৱন্তং সম্প্রাপদ্ধরণিধরমুদ্যন্তমুদকাত্॥ ২ ॥

অহো আরণ্যোযং মৃগ ইতি হসন্তং বহুতরৈ-
র্দুরুক্তৈর্ৱিধ্যন্তং দিতিসুতমৱজ্ঞায ভগৱন্।
মহীং দৃষ্টৱা দংষ্ট্রাশিরসি চকিতাং স্বেন মহসা
পযোধাৱাধায প্রসভমুদযুঙকথা মৃধৱিধৌ॥ ৩ ॥

গদাপাণৌ দৈত্যে ত্বমপি হি গৃহীতোন্নতগদো
নিযুদ্ধেন ক্রীডন্ ঘটঘটরৱোদঘুষ্টৱিযতা।
রণালোকৌতসুক্যান্মিলতি সুরসঙঘে দ্রুতমমুং
নিরুন্ধ্যাসসন্ধ্যাতঃ প্রথমমিতি ধাত্রা জগদিষে॥ ৪ ॥

গদোন্মর্দে তস্মিংস্তৱ খলু গদাযাং দিতিভুৱো
গদাঘাতাদভূমৌ ঝটিতি পতিতাযামহহ! ভোঃ!।
মৃদুস্মেরাস্যস্তৱং দনুজকুলনির্মূলনচণং
মহাচক্রং স্মৃত্বা করভুৱি দধানো রুরুচিষে॥ ৫ ॥

www.prapatti.com

ততঃ শূলং কালপ্রতিমরুষি দৈত্যে ৱিসৃজতি
ত্বযি ছিন্দত্যেনত্ করকলিতচক্রপ্রহরণাত্।
সমারুষ্টো মুষ্ট্যা স খলু ৱিতুদংস্তৱাং সমতনোত
গলন্মাযে মাযাস্তৱযি কিল জগন্মোহনকরীঃ॥ ৬ ॥

ভৱচ্চক্রজ্যোতিষ্কণলৱনিপাতেন ৱিধুতে
ততো মাযাচক্রে ৱিততঘনরোষান্ধমনসম্।
গরিষ্ঠাভির্মুষ্টিপ্রহৃতিভিরভিঘ্নন্তমসুরং
স্বপাদাঙ্গুষ্ঠেন শ্রৱণপদমূলে নিরৱধীঃ॥ ৭ ॥

মহাকাযসসোযং তৱ চরণপাতপ্রমথিতো
গলদ্রক্তো ৱক্ত্রাদপতদৃষিভিঃ শ্লাঘিতহতিঃ।
তদা ত্বামুদ্দামপ্রমদভরৱিদ্যোতিহৃদযা
মুনীন্দ্রাসসান্দ্রাভিঃ স্তুতিভিরনুৱন্নধ্বরতনুম্॥ ৮ ॥

ত্বচি ছন্দো রোমস্বপি কুশগণশ্চক্ষুষি ঘৃতং
চতুর্হোতারোঙ্ঘ্রৌ স্রুগপি ৱদনে চোদর ইডা।
গ্রহা জিহ্বাযাং তে পরপুরুষ কর্ণে চ চমসা
ৱিভো সোমো ৱীর্যং ৱরদ গলদেশেপ্যুপসদঃ॥ ৯ ॥

মুনীন্দ্রৈরিত্যাদিস্তৱনমুখরৈর্মোদিতমনা
মহীযস্যা মূর্ত্যা ৱিমলতরকীর্ত্যা চ ৱিলসন্।
স্বধিষ্ণ্যং সম্প্রাপ্তঃ সুখরসৱিহারী মধুরিপো
নিরুন্ধ্যা রোগং মে সকলমপি ৱাতালযপতে॥ ১০ ॥

**********


www.prapatti.com